# Kashipravishtum Kashmiragananayakadipujanamahattvavarnanam

# કાશીપ્રવિષ્ટું કાશ્મીરગણનાયકાદિપૂજનમહત્ત્વવર્ણનમ્

## Document Information

Text title : Kashipravishtum Kashmiragananayakadipujanamahattvavarnanam

File name : kAshIpraviShTuMkAshmIragaNanAyakAdipUjanamahattvavarNanam.itx

Category : ganesha, shiva, pUjA, shivarahasya

Location : doc_ganesha

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 7 | 79-102||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# કાશીપ્રવિષ્ટું કાશ્મીરગણનાયકાદિપૂજનમહત્ત્વવર્ણનમ્

ગૌરીશૃઙ્ગમિતિખ્યાતમેકશૃઙ્ગં વરં મુને ।
તત્રાસ્ત્યેકં સરો રમ્યં દિવ્યોદકવિરાજિતમ્ ॥ ૭૯॥

તત્તીરે વિમલં લિઙ્ગમેકં ગૌર્યા વિનિર્મિતમ્ ।
તત્ર કાશ્મીરગણપઃ કશ્ચિદ્ગૌર્યા વિનિર્મિતઃ ॥ ૮૦॥

તત્ર ગૌર્યાસ્સરસ્તીરે સ્નાનં કૃત્વા વિધાનતઃ ।
લિઙ્ગં સમ્પૂજ્ય યત્નેન યથાશાસ્ત્રં તતઃ પરમ્ ॥ ૮૧॥

યથાશાસ્ત્રં વિધાનેન કાશ્મીરગણનાયકમ્ ।
પૂજયસ્વાતિયત્નેન ગણાનાં ત્વેતિ મન્ત્રતઃ ॥ ૮૨॥

તત્પ્રીત્યર્થં તપશ્ચર્યા તત્ર કાર્યા નિરન્તરમ્ ।
પઞ્ચાગ્નિ મધ્ય(ધ્યે)પઞ્ચાસ્યપુત્રધ્યાનપુરઃસરમ્ ॥ ૮૩॥

ગણાનાં ત્વેતિ મન્ત્રોઽયં સર્વવિઘ્નવિનાશકઃ ।
જપનીયઃ પ્રયત્નેન સર્વવિઘ્નોપશાન્તયે ॥ ૮૪॥

ઇત્યુક્તસ્તદનુજ્ઞાતઃ સન્તુષ્ટઃ શૈવપુઙ્ગવઃ ।
મત્વાકૃતાર્થમાત્માનં ગૌરીશૃઙ્ગં જગામ ચ ॥ ૮૫॥

તસ્મિન્સરોવરે રમ્યે સ્નાનાર્થં વિધિપૂર્વકમ્ ।
ગૌરીલિઙ્ગમિતિખ્યાતં તલ્લિઙ્ગમતિશોભનમ્ ॥ ૮૬॥

તતો બિલ્વદલૈઃ શુદ્ધૈસ્તત્સરોવિમલૈર્જલૈઃ ।
પૂજયામાસ પૂતાત્મા ગૌરીલિઙ્ગમઘાપહમ્ ॥ ૮૭॥

તતો ગણાધિપં સમ્યગભિષિચ્ય યથાવિધિ ।
ચકાર પૂજાં વિમલૈર્બિલ્વદૂર્વાઙ્કુરૈરપિ ॥ ૮૯॥

પ્રણમ્ય બહુધા સ્તુત્વા મનું વિઘ્નહરં જપન્ ।
પઞ્ચાગ્નિમધ્યે સંવિશ્ય તપશ્ચક્રે દૃઢવ્રતઃ ॥ ૯૦॥

શૈવમુગ્રતપોનિષ્ઠં વિલોક્યેન્દ્રાદયઃ સુરાઃ ।
કમ્પાયમાનાસ્તિષ્ઠન્તિ કૃતાઞ્જલિપુટઃ સદા ॥ ૯૧॥

એવમેવ સ શૈવેન્દ્રસ્ત્રિપઞ્ચાશદ્યુગાવધિ ।
ચક્રારોગ્રં તપઃ સમ્યક્ ત્યક્તાહારો ભૃશં મુદા ॥ ૯૨॥

તતઃ પ્રસાદિતસ્તેન ગણેશો વિઘ્નનાશકઃ ।
વિઘ્નાન્ધકારમાર્તાણ્ડશુણ્ડદણ્ડવિરાજિતઃ ॥ ૯૩॥

પ્રસન્ને સતિ વિઘ્નેશે સ્તુત્વા નત્વા મુહુર્મુહુઃ ।
યયાચે સ વરં સ્વેષ્ટં સર્વવિઘ્નૌઘનાશકમ્ ॥ ૯૪॥

ગૌરીસુત ગણાધીશ ગજવક્ત્ર શિવપ્રિય ।
વિષ્ણુપૂજિતપાદાબ્જ પ્રસીદ વરદો ભવ ॥ ૯૫॥

ગણેશ સર્વવિઘ્નેશ વિઘ્નાન્ સંહર સંહર ।
કાશીપ્રાપ્તિર્યથા ભૂયાત્તથા કુરુ મમાનઘ ॥ ૯૬॥

કાશીપ્રાપ્ત્યર્થમુદ્યુક્તં યથા માં વિઘ્નરાશયઃ ।
ન બાધન્તે સદા સમ્યક્ તથા કુરુ ગણેશ્વર ॥ ૯૬॥

ઇતિ સમ્પ્રાર્થિતસ્તેન વિઘ્નેશો વિઘ્નનાશકઃ ।
સ પ્રીતો વરદસ્તસ્મૈ દદૌ વરમનુત્તમમ્ ॥ ૯૭॥

તતસ્તદાજ્ઞયા શૈવઃ સન્તુષ્ટઃ સમ્પ્રણમ્ય ચ ।
કાશીં શિવપુરીં રમ્યામાજગામ મહામતિઃ ॥ ૯૮॥

તતઃ કાશીરક્ષકાંશ્ચ સમ્પ્રસાદ્ય દ્વિજોત્તમઃ ।
સ્નાત્વા ચ શિવગઙ્ગાયામાગ્નીધ્રેશં પ્રણમ્ય ચ ॥ ૯૯॥

વક્રતુણ્ડેશમભ્યર્ચ્ય નત્વા શ્રીકાલભૈરવમ્ ।
વીરેશમભિવાદ્યૈવ નત્વા પશુપતીશ્વરમ્ ॥ ૧૦૦॥

દણ્ડપાણિપ્રસાદેન જ્ઞાનવાપીજલેઽમલે ।
સ્નાત્વા જ્ઞાનેશમભ્યર્ચ્ય નત્વા પઞ્ચવિનાયકાન્ ॥ ૧૦૧॥

ઢુણ્ઢિરાજં સમભ્યર્ચ્ય સર્વવિઘ્નૌઘનાશકમ્ ।
તતો વિવેશ ધર્માત્મા મહાશૈવાશ્રયં સદા ॥ ૧૦૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે હિમવાન્પ્રોક્તં કાશીપ્રવિષ્ટું કાશ્મીરગણનાયકાદિપૂજનમહત્ત્વવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૭ । ૭૯-૧૦૨॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 7 . 79-102..

Notes:

Himvān હિમવાન્ speaks about a hill called Gaurīśṛṅga ગૌરીશૃઙ્ગ at Kāśī કાશી, where Gaurī ગૌરી created a Śivaliṅga શિવલિઙ્ગ called gaurIliṅga ગૌરીલિઙ્ગ by a nearby pond, and also created a form of Gaṇeṣa ગણેશ called Kāśmīragaṇanāyaka કાશ્મીરગણનાયક. Himvān હિમવાન્ further outlines the importance of worshiping the several Guardians of Kāśī કાશી for being able to gain entry into Kāśī કાશી; that include Kālabhairava કાલભૈરવ, Vīreśvara વીરેશ્વર, Paśupatīśvara પશુપતીશ્વર, and Daṇḍapāṇi દણ્ડપાણિ - whose Grace keeps the Waters of Jñānavāpī જ્ઞાનવાપી pure. He also emphasizes the worship of several forms of Gaṇeṣa ગણેશ - like Vakratuṇḍa વક્રતુણ્ડ, PañcaVināyaka પઞ્ચવિનાયક, Ḍhuṇḍhirāja ઢુણ્ઢિરાજ et al who remove the obstacles thus for the worshiper.

Kaśī કાશી harbors several ŚivaTīrthaKṣetra શિવતીર્થક્ષેત્ર that are outlined in ŚivaRahasyam saptāṃśaḥ શિવરહસ્યં સપ્તાંશઃ.

Proofread by Ruma Dewan

---

*Kashipravishtum Kashmiragananayakadipujanamahattvavarnanam*
pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*